# Navaratna Yamuna Ashtaka Stotram

# નવરત્નયમુનાષ્ટકસ્તોત્રમ્

## Document Information

Text title : Navaratna Yamuna Ashtaka Stotram 11

File name : yamunAShTakam11.itx

Category : devii, nimbArkAchArya, aShTaka, devI

Location : doc_devii

Author : shrIji

Proofread by : Mohan Chettoor

Latest update : January 7, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 7, 2023

*sanskritdocuments.org*

# નવરત્નયમુનાષ્ટકસ્તોત્રમ્

કદાચિત્તે તીરે જનનિ જનની વાક્યમમૃતં
ગૃહીત્વા શુદ્ધત્વં ધ્રુવપદમગાન્માતૃસહિતઃ ।
મહિમ્નઃ શ્રુત્વા તે પ્રચુરતરવિત્તિં ધ્રુવજનઃ
તપસ્તપ્ત્વા સદ્યઃ શરણમિતિ યાતસ્તવતટમ્ ॥ ૧॥

કદાચિત્તે દેવ્યાઃ સકલજનુરુત્તારણપયઃ
વિહારસ્થાને વૈ પ્રકટિતતરઙ્ગૈઃ પટુતરમ્ ।
સદા સ્વસ્થૈર્દેવૈઃ સરલહૃદયૈઃ સેવિતતમં
વયં પીત્વા કુર્મ્મઃ પ્રચુરકલુષં સમ્પ્રતિ હતમ્ ॥ ૨॥

કદાચિન્મે ભાગ્યાત્તવ તરણિતીરે ભવહરે !
મહદ્વૃન્દાટવ્યાં કિમપિ જનનં મે ભવતુ વા ।
ગવાં રમ્યે સ્થાને પરિરટનપાટીહરહરે !
ભવિષ્યત્યેષાં વૈ જનનિજનુષોર્ભૂરિમહિમા ॥ ૩॥

કદાચિન્મે ચિત્તં હરિચરણસેવાં પ્રસરતુ
ભવદ્વાત્સલ્યાદ્વૈ સુરમનુજભક્તૈઃ પરિચિતામ્ ।
સદા તે વેલાયાં ભવ કમલપુષ્પૈઃ પરિહૃતા
ઇયં મે વાઞ્છા સ્યાત્તવ તટ સુસેવા ભવતુ તવા ॥ ૪॥

કદાચિન્મે માતર્મદુપરિ કૃપા તે સુકૃતજા
ભવિષ્યત્યેષા વૈ તવ જલતરઙ્ગોઞ્ઝુલિતિભીઃ ।
હરેઃ સાન્દ્રં રૂપં મદતતિઘનશ્યામમમલં
અહં દ્રક્ષ્યે સૌમ્યં સખિજનપરીતં તબ તટે ॥ ૫॥

કદાચિન્માર્તણ્ડી વિષયરસખણ્ડી કલુષજા
પ્રચણ્ડી સ્વાવેગૈર્જગદઘવિખણ્ડી સ્વયશસા ।
શિવા શાન્તા નિત્યં તરલસરલૈઃ શોભિતતરાં
મમાભીષ્ટં દેયાદ્વ્રજજનસુસેવાં તવ તટે ॥ ૬॥

કદાચિત્કાલિન્દી મુનિવરવરૈઃ સેવિતતટી
 હરે ! વિષ્ણો ! રાધે ! સુરટનપરૈઃ કૂજિતકુટી ।
પ્રવાહે કિં શબ્દૈઃ પ્રિયરમણકાન્તં પરિરટી
 કિમન્યદ્યાગ્યાભિઃ પ્રભવતુ સદા મે ભવવટી ॥ ૭॥

કદાચિચ્છ્રીકૃષ્ણે દૃઢતમકૃતાન્ પાપનિચયાન્
 કુરુત્વં દૃષ્ટિં માં તવ મહિમનિત્વં ભવ દૃઢા ।
કદા ભ્રાતુર્લોકં બહુતરહઠો મે પ્લુતજલા
 અતો મે માયાં તાં હરતુ જનનિ પ્રાર્થનમિદમ્ ॥ ૮॥

નવરત્નમિદં પુણ્યં પ્રાતઃ સાયં પઠેન્નરઃ ।
હરિસ્તસ્મૈ પ્રસન્નો વૈ દદાતિ ફલમીપ્સિતમ્ ॥ ૯॥

નવરત્નાત્પરં કિઞ્ચિન્નાન્યદસ્તિ મહીતલે ।
સર્વવેદેતિહાસાનાં સારં હ્યસ્મિન્નુદાહૃતમ્ ॥ ૧૦॥

ઇતિ શ્રીમન્નિમ્બાર્કપટ્ટાધિરૂઢશ્રી સર્વેશ્વરશરણદેવાચાર્યચરણચઞ્ચરીક
શ્રીમન્નિમ્બાર્કશરગદેવાચાર્યવિરચિતનવરત્ન
શ્રીયમુનાષ્ટકસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Mohan Chettoor

*Navaratna Yamuna Ashtaka Stotram*
pdf was typeset on January 7, 2023

Please send corrections to *sanskrit@cheerful.com*